# शिव हरे शिव राम सखे प्रभो

शिव हरे शिव राम सखे प्रभो, त्रिविधतापनिवारण हे विभो ।
अज जनेश्वर यादव पाहि मां, शिव हरे विजयं कुरु मे वरम् ।।
कमललोचन राम दयानिधे, हर गुरो गजरक्षक गोपते ।
शिवतनो भव शङ्कर पाहि मां, शिव हरे विजयं कुरु मे वरम् ।।
सुजनरञ्जन मङ्गलमन्दिरं, भजति ते पुरुषः परमं पदम् ।
भवति तस्य सुखं परमद्भुतं, शिव हरे विजयं कुरु मे वरम् ।।
जय युधिष्ठिरवल्लभ भूपते, जय जयार्जितपुण्यपयोनिधे ।
जय कृपामय कृष्ण नमोऽस्तु ते, शिव हरे विजयं कुरु मे वरम् ।।
भवविमोचन माधव मापते, सुकविमानसहंस शिवारते ।
जनकजारत राघव रक्ष माम्, शिव हरे विजयं कुरु मे वरम् ॥
अवनिमण्डलमंगल मापते, जलदसुन्दर राम रमापते ।
निगमकीर्तिगुणार्णव गोपते, शिव हरे विजयं कुरु मे वरम् ॥
पतितपावन नाममयी लता, तव यशो विमलं परिगीयते ।
तदपि माधव मां किमुपेक्षसे, शिव हरे विजयं कुरु मे वरम् ॥
अमरतापरदेव रमापते, विजयतस्तव नामधनोपमा ।
मयि कथं करुणार्णव जायते, शिव हरे विजयं कुरु मे वरम् ॥
हनुमतः प्रिय चापकर प्रभो, सुरसरिद्धृतशेखर हे गुरो ।
मम विभो किमु विस्मरणं कृतं, शिव हरे विजयं कुरु मे वरम् ॥
अहरहर्जनरञ्जनसुन्दरं, पठति यः शिवरामकृतं स्तवम् ।
विशति रामरमाचरणाम्बुजे, शिव हरे विजयं कुरु मे वरम् ॥
प्रातरुत्थाय यो भक्त्या पठेदेकाग्रमानसः ।
विजयो जायते तस्य विष्णुमाराध्यमाप्नुयात् ॥